

# ॥ श्रीकृष्ण स्तुतिः – श्रीमहादेव कृतं – श्रीब्रह्मवैवर्त पुराणम् ॥

## Sri Krishna Stuti – Sri Mahadeva – Brahma Vaivarta Puranam

The following is a rare hymn on on **Lord Krishna** by **Lord Mahadeva** taken from **Brahma Vaivarta Puranam**, **Ganapati Khanda**, and **Chapter 32** as told to **Bhrigu**.

The brief **Phalashruti** at the end of the hymn mentions that one who recites this hymn thrice a day begets **Dharma**, **Artha**, **Kama**, **Moksha**, service and **Bhakti** to **Vishnu** and as venerable as **Lord Vishnu** Himself. He also begets good health, character, wisdom, wealth by the grace of **Lord Krishna**.

श्रीमहादेव उवाच –

परंब्रह्म परंधाम परंज्योतिः सनातनम् ।
निर्लिप्तं परमात्मानं नमाम्यखिल-कारणम् ॥ १ ॥

स्थूलात्-स्थूल-तमं देवं सूक्ष्मात्-सूक्ष्म-तमं परम् ।
सर्व-दृश्यं-अदृश्यं च स्वेच्छाचारं नमाम्यहम् ॥ २ ॥

साकारं च निराकारं सगुणं निर्गुणं प्रभुम् ।
सर्वाधारं च सर्वं च स्वेच्छा-रूपं नमाम्यहम् ॥ ३ ॥

अतीव-कमनीयं च रूपं निरुपमं विभुम् ।
करालरूपं अत्यन्तं बिभ्रतं प्रणमाम्यहम् ॥ ४ ॥

कर्मणः-कर्म-रूपं च साक्षिणं-सर्व-कर्मणाम् ।
फलं च फल-दातारं सर्वरूपं नमाम्यहम् ॥ ५ ॥

स्रष्टा पाता च संहर्ता कलया-मूर्ति-भेदतः ।
नानामूर्तिः-कलांशेन यः पुमांस् तं नमाम्यहम् ॥ ६ ॥

स्वयं-प्रकृति-रूपश्च मायया च स्वयं पुमान् ।
तयोः परः स्वयं शश्वत् तं नमामि परात्परम् ॥ ७ ॥

स्त्री-पुं-नपुंसकं-रूपं यो-बिभर्ति-स्वमायया ।
स्वयं-माया स्वयं-मायी यो देवस् तं नमाम्यहम् ॥ ८ ॥

तारकं-सर्व-दुःखानां सर्व-कारण-कारणम् ।
धारकं-सर्व-विश्वानां सर्व-बीजं नमाम्यहम् ॥ ९ ॥

तेजस्विनां-रविर्-यो-हि सर्व-जातिषु-वाडवः ।
नक्षत्राणां-यश्चन्द्रमस् तं नमामि जगत्प्रभुम् ॥ १० ॥

रुद्राणां वैष्णवानां च ज्ञानिनां यो हि शङ्करः ।
नागानां-यो-हि-शेषश्च तं नमामि जगत्पतिम् ॥ ११ ॥

प्रजापतीनां-यो-ब्रह्मा सिद्धानां-कपिलः-स्वयम् ।
सनत्कुमारो-मुनिषु तं नमामि जगद्गुरुम् ॥ १२ ॥

देवानां-यो-हि-विष्णुश्च देवीनां-प्रकृतिः-स्वयम् ।
स्वायंभुवो-मनूनां यो मानवेषु-वैष्णवः ।
नारीणां-शतरूपा च बहुरूपं नमाम्यहम् ॥ १३ ॥

ऋतूनां-यो-वसन्तश्च मासानां-मार्गशीर्षकः ।
एकादशी-तिथीनां च नमाम्यखिल-रूपिणम् ॥ १४ ॥

सागरः-सरितां-यश्च पर्वतानां-हिमालयः ।
वसुन्धरा-सहिष्णूनां तं सर्वं प्रणमाम्यहम् ॥ १५ ॥

पत्राणां-तुलसी-पत्रं दारु-रूपेषु-चन्दनम् ।
वृक्षाणां-कल्पवृक्षो-यस् तं नमामि जगत्पतिम् ॥ १६ ॥

पुष्पाणां-पारिजातश्च सस्यानां-धान्यमेव च ।
अमृतं-भक्ष्य-वस्तूनां नानारूपं नमाम्यहम् ॥ १७ ॥

ऐरावतो-गजेन्द्राणां वैनतेयश्च-पक्षिणाम् ।
कामधेनुश्च-धेनूनां सर्वरूपं नमाम्यहम् ॥ १८ ॥

तैजसानां-सुवर्णं च धान्यानां-यव एव च ।
यः-केशरी-पशूनां च वररूपं नमाम्यहम् ॥ १९ ॥

यक्षाणां-च-कुबेरो-यो ग्रहाणां-च-बृहस्पतिः ।
दिक्पालानां-च-महेन्द्रश्च तं नमामि परं वरम् ॥ २० ॥

वेद-सङ्घश्च-शास्त्राणां पण्डितानां-सरस्वती ।
अक्षराणां-अकारो-यस् तं प्रधानं नमाम्यहम् ॥ २१ ॥

मन्त्राणां-विष्णु-मन्त्रश्च तीर्थानां-जाह्नवी-स्वयम् ।
इन्द्रियाणां-मनो-यो-हि सर्व-श्रेष्ठं नमाम्यहम् ॥ २२ ॥

सुदर्शनं-च-शस्त्राणां व्याधीनां-वैष्णवो-ज्वरः ।
तेजसां-ब्रह्मतेजश्च वरेण्यं तं नमाम्यहम् ॥ २३ ॥

बलं-यो-वै-बलवतां मनो-वै-शीघ्र-गामिनाम् ।
कालः-कलयतां-यो-हि तं नमामि विचक्षणम् ॥ २४ ॥

ज्ञानदाता-गुरूणां च मातृरूपश्च-बन्धुषु ।
मित्रेषु-जन्मदाता-यस् तं सारं प्रणमाम्यहम् ॥ २५ ॥

शिल्पीनां-विश्वकर्मा-यः कामदेवश्च-रूपिणाम् ।
पतिव्रता-च-पत्नीनां नमस्यं तं नमाम्यहम् ॥ २६ ॥

प्रियेषु-पुत्ररूपो-यो नृपरूपो-नरेषु च ।
शालग्रामश्च-यन्त्राणां तं विशिष्टं नमाम्यहम् ॥ २७ ॥

धर्मः-कल्याण-बीजानां वेदानां-सामवेदकः ।
धर्माणां-सत्यरूपो-यो विशिष्टं तं नमाम्यहम् ॥ २८ ॥

जले-शैत्य-स्वरूपो-यो गन्ध-रूपश्च-भूमिषु ।
शब्दरूपश्च-गगने तं प्रणम्यं नमाम्यहम् ॥ २९ ॥

क्रतूनां-राजसूयो-यो गायत्री-छन्दसां-च-यः ।
गन्धर्वाणां-चित्ररथस् तं गरिष्ठं नमाम्यहम् ॥ ३० ॥

क्षीर-स्वरूपो-गव्यानां पवित्राणां-च-पावकः ।
पुण्यदानां-च-यः-स्तोत्रं तं नमामि शुभप्रदम् ॥ ३१ ॥

तृणानां-कुशरूपो-यो व्याधि-रूपश्च-वैरिणाम् ।
गुणानां-शान्तरूपो-यश् चित्ररूपं नमाम्यहम् ॥ ३२ ॥

तेजोरूपो ज्ञानरूपः सर्वरूपश्च यो महान् ।
सर्वाऽनिर्वचनीयं च तं नमामि स्वयं विभुम् ॥ ३३ ॥

सर्वाधारेषु-यो-वायुर् यथाऽऽत्मा-नित्यरूपिणाम् ।
आकाशो-व्यापकानां-यो व्यापकं तं नमाम्यहम् ॥ ३४ ॥

वेदानिवर्चनीयं-यं न स्तोतुं पण्डितः क्षमः ।
यदनिर्वचनीयं च को वा तत् स्तोतुं ईश्वरः । ३५ ॥

वेदा-न-शक्ता-यं-स्तोतुं जडीभूता-सरस्वती ।
तं च वाङ्-मनसोः-पारं को विद्वान्स् स्तोतुं ईश्वरः ॥ ३६ ॥

शुद्ध-तेजः-स्वरूपं च भक्ताऽनुग्रह-विग्रहम् ।
अतीव-कमनीयं च श्यामरूपं नमाम्यहम् ॥ ३७ ॥

द्विभुजं मुरली वक्त्रं किशोरं सस्मितं मुदा ।
शश्वद्-गोपाङ्गनाभिश्च वक्ष्यमाणं नमाम्यहम् ॥ ३८ ॥

राधया-दत्त-ताम्बूलं भुक्तवन्तं मनोहरम् ।
रत्न-सिंहासनस्थं च तमीशं प्रणमाम्यहम् ॥ ३९ ॥

रत्न-भूषण-भूषाढ्यं सेवितं श्वेत चामरैः ।
पार्षद-प्रवरैर् गोपकुमारैस् तं नमाम्यहम् ॥ ४० ॥

बृन्दावनान्तरे रम्ये रासोल्लास-समुत्सुकम् ।
रास-मण्डल-मध्यस्थं नमामि रसिकेश्वरम् ॥ ४१ ॥

शतशृङ्गे-माहाशैले गोलोके रत्न-पर्वते ।
विरजा पुलिने रम्ये प्रणमामि विहारिणम् ॥ ४२ ॥

परिपूर्णतमं शान्तं राधाकान्तं मनोहरम् ।
सत्यं ब्रह्म-स्वरूपं च नित्यं कृष्णं नमाम्यहम् ॥ ४३ ॥

## ॥ फलश्रुतिः ॥

श्रीकृष्णस्य स्तोत्रं इदं त्रिसन्ध्यं यः पठेन् नरः ।
धर्मार्थ-काम-मोक्षाणां स दाता भारते भवेत् ॥ ४४ ॥

हरि-दास्यं हरौ-भक्तिं लभेत् स्तोत्र प्रसादतः ।
इह लोके जगत्पूज्यो विष्णु-तुल्यो भवेद् ध्रुवम् ॥ ४५ ॥

सर्व-सिद्धेश्वरः शान्तोऽपि अन्ते याति हरेः पदम् ।
तेजसा यशसा भाति यथा सूर्यो महीतले ॥ ४६ ॥

जीवन्मुक्तः कृष्ण-भक्तः स भवेन् नात्र-संशयः ।
अरोगी गुणवान् विद्वान् पुत्रवान् धनवान् सदा ॥ ४७ ॥

षडभिज्ञो दशबलो मनोमायी भवेद् ध्रुवम् ।
सर्वज्ञः सर्वदश्चैव स दाता सर्व-संपदाम् ॥ ४८ ॥

कल्पवृक्ष-समः शश्वद् भवेत् कृष्ण प्रसादतः ।
इत्येवं कथितं स्तोत्रं वत्स त्वं गच्छ पुष्करम् ॥ ४९ ॥

तत्र कृत्वा मन्त्र-सिद्धिं पश्चात् प्राप्स्यसि वाञ्छितम् ।
त्रिः सप्त कृत्वो निर्भूपां कुरु पृथ्वीं यथासुखम् ।
ममाऽऽशिषा मुनिश्रेष्ठ श्रीकृष्णस्य प्रसादतः ॥ ५० ॥

---

॥ इति श्रीब्राह्मे वैवर्ते महापुराणे गणपति खण्डे द्वात्रिंशोऽध्याये श्री कृष्ण स्तुतिः सम्पूर्णम् ॥